# संस्कृत प्रथम प्रवेशः

★

विद्वान्

एन्. रङ्गनाथशर्मा



# संस्कृत प्रथम प्रवेशः

विद्वान्
एन्. रङ्गनाथशर्मा
व्याकरणशास्त्रप्राध्यापकः
श्रीचामराजेन्द्रसंस्कृतमहापाठशाला
बेङ्गलूरुनगरी–१८

★

संस्कृतसंवर्धिनीसभायाः
ग्रन्थमाला–४

प्रथमं मुद्रणम्

१९७०

रु. १–२०

First Edition—1970

Copies 3,000

All Rights reserved
by
the Author

Printed at
Sree Mallikarjuna Press
Bangalore–2A

Price: 1–20

# विज्ञापना

अपरोक्षमिदं समेषां संस्कृतविदुषां यदद्यत्वे सत्स्वपि बहुषु च्छात्रेषु संस्कृतभाषामधिजिगांसमानेषु, तेभ्यो रोचमानानि सरलगद्य बहुलानि पठ्यपुस्तकानि विरलानीति । तामिमां न्यूनतामनुसन्धाय कतिपये कृतिनः कानिचित् पुस्तकानि यद्यपि प्राणैषुः, तथापि तानि मुद्रितानवशिष्टानि दुर्लभानि । कानिचित् पुनः प्राचीनां पाठनपद्धति-मनुरुध्यमानानि, अपराणि तु केवलां नूतनां पद्धतिम् । 'पुराणमित्येव न साधु सर्वं नचाप्यवद्यं निखिलं नवीनम्' इति मन्यमानेन मया कश्चन मध्यवर्तिनं मार्गमवलम्ब्य पुस्तकमिदं विरचय्य प्रकाशितम् । सोऽयं 'संस्कृत प्रथम प्रवेशः' छात्राणामुपयोगाय भूयादित्याशासे ॥

बेङ्गलूरनगरी
ता. १५-४-७०

विद्वदनुचरः
रङ्गनाथशर्मा

# अनुक्रमणिका


| पाठः | | पृष्ठम् |
|---|---|---|
| मङ्गलम् | | १ |
| अक्षरमाला | | २–४ |
| १–११ | सरलवाक्यसमूहः | ५–१६ |
| १२ | पाठशाला | १७ |
| १३ | कपयः | १९ |
| १४ | त्रयः मीनाः | २१ |
| १५ | संभाषणम् | २३ |
| १६ | प्राणिवर्गः | २६ |
| १७ | चतुरः शृगालः | ३२ |
| १८ | मार्जालयोः कलहः | ३५ |
| १९ | संमिश्रवाक्यानि | ३९ |
| २० | श्रीहर्षः | ४१ |
| २१ | भारतदेशः | ४३ |
| २२ | महात्मा गान्धिः | ४६ |
| २३ | रुग्णः बधिरश्च | ४९ |
| २४ | छान्दसानां कविता | ५१ |
| २५ | सुभाषितवाक्यानि | ५४ |
| २६ | लङ्कादेवतापराजयः | ५५ |
| २७ | सुभाषितानि | ५९ |
| २८ | चाटुश्लोकाः | ६१ |
| सन्धिप्रकरणम् | | ६२ |

# संस्कृत प्रथम प्रवेशः



श्री गणाधिपतये नमः

श्री शारदायै नमः

श्री गुरवे नमः

अगजाननपद्मार्कं गजाननमहर्निशम् ।

अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

# अक्षरमाला

## स्वराः

अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ अं अः

## व्यञ्जनानि

क ख ग घ ङ    च छ ज झ ञ

ट ठ ड ढ ण    त थ द ध न

प फ ब भ म

य र ल व श ष स ह

क् ख् ग् घ् ङ्

| | | | |
|---|---|---|---|
| क्+अ | क | क्+ऋ | कृ |
| क्+आ | का | क् + ॠ | कॄ |
| क्+इ | कि | क् + ऌ | कॢ |
| क्+ई | की | क् + ए | के |
| क्+उ | कु | क् + ऐ | कै |
| क्+ऊ | कू | क् + ओ | को |

क्+औ कौ

क्+अं कं    क्+अः कः

## गुणिताक्षराणि

क का कि की कु कू कृ कॄ के कै को कौ कं कः

च चा चि ची चु चू चृ चॄ चे चै चो चौ चं चः

य या यि यी यु यू यृ यॄ ये यै यो यौ यं यः

श शा शि शी शु शू शृ शॄ शे शै शो शौ शं शः

सूचना :—संस्कृतभाषायां एकारस्य ओकारस्य च ह्रस्वौ न स्तः। ऌकारोऽपि नास्ति। स तु वेदे दृश्यते। ऌकारस्य दीर्घो नास्ति। अनुस्वारविसर्गौ अं अः इत्यादौ स्वरात् परावेव भवतः॥

# 4

## संयुक्ताक्षराणि

| | | |
|---|---|---|
| र् य=र्य | घ् न=घ्न | ख् य=ख्य |
| ग् न=ग्न | ञ् च=ञ्च | द् ग=द्ग |
| ज् व=ज्व | न् न=न्न | ङ् घ=ङ्घ |
| न् य=न्य | त् र=त्र | र् त=र्त |
| श् ल=श्ल | क् त=क्त | न् द् र=न्द्र |
| श् र=श्र | श् व=श्व | स् त्=स्त |
| स् क=स्क | क् ष=क्ष | ण् ड=ण्ड |
| त् म=त्म | ज् ञ=ज्ञ | क् ष्=क्ष |
| क् र=क्र | न् द्=न्द् | ज् य=ज्य |
| ष् ट=ष्ट | क् क=क्क | क् ल=क्ल |
| च् छ=च्छ | ष् ठ=ष्ठ | द् व=द्व |
| ष् ट् र=ष्ट्र | स् य=स्य | प् ल=प्ल |

# प्रथमः पाठः



ज् + अ ज

अजः



गजः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| करः | हयः | रथः | बकः | नरः | कटः | यवः | शरः |
| जयः | झषः | तटः | दलः | चयः | पणः | लवः | रसः |

सः अजः

अयं गजः

## द्वितीयः पाठः

ह् + आ हा      प् + इ पि      ग् + उ गु



चापः   बाणः

हारः

पादः   पाकः   रामः   कालः   तालः

तापः   कपिः   पिकः   मुनिः   गिरिः   हरिः

गुरुः   मतिः   पतिः

फलम्   वनम्   जलम्

सः हारः   अयं चापः   इदं फलम्

## तृतीयः पाठः

द + ई दी    श् + ऊ शू    म् + ऋ मृ



दीपः धूपः

नदी नारी शूरः धीरः मीनः कूपः मूढः सीता

पीनः वधूः दूतः दासी गीता मृगः कृषिः तृषा

गृहम् घृतम् ऋषिः

दीपः ज्वलति    मीनः चरति

# चतुर्थः पाठः

ध् + ए धे   य् + ओ यो   श् + ऐ शै   न् + औ नौ

देवः मेघः शेषः चोरः लोकः कोपः रोगः शैलः

कैलासः यौवनम् गौरवम् औषधम् दैवतम् शैशवम्



धेनुः



योधः

हंसः कंसः सिंहः दुःखम्

योधः धावति   धेनुः गच्छति

## पञ्चमः पाठः



बालकः

बालिका



शुनकः मूषकः बिडालः शृगालः शारदा जानकी

कमलम् वचनम् आकाशम्

लेखनी भाषणम् भोजनम् वैभवम् सौहृदम्

स्वराज्यम् सौजन्यम् स्वागतम्

इन्द्रः चन्द्रः

सः बालकः सा बालिका तत् कमलम्

## षष्ठः पाठः



# सूर्यः शङ्खः

मश्वः धर्मः न्यायः अग्निः शक्तिः कीर्तिः श्लोकः
व्याघ्रः प्रश्नः मूर्खः क्षयः क्लेशः कृष्णः सूक्ष्मः

भिक्षा कक्ष्या संख्या चर्चा लज्जा
अन्नम् काष्ठम् वस्त्रम् नेत्रम् भक्ष्यम्

ईश्वरः मनुष्यः पण्डितः समुद्रः सर्वज्ञः
भास्करः भ्रमरः लक्ष्मणः कन्दुकः

सूर्यः दिवा राजति बालः शङ्खं धमति

## सप्तमः पाठः

| | | |
|---|---|---|
| गजः | गजौ | गजाः |
| अश्वः | अश्वौ | अश्वाः |

| | | |
|---|---|---|
| गजः गच्छति | गजौ गच्छतः | गजाः गच्छन्ति |
| अश्वः धावति | अश्वौ धावतः | अश्वाः धावन्ति |
| बालः पठति | बालौ पठतः | बालाः पठन्ति |
| कपिः भक्षयति | कपी भक्षयतः | कपयः भक्षयन्ति |
| धेनुः तृणं भक्षयति | धेनू जलं पिबतः | धेनवः क्षीरं यच्छन्ति |
| बालकाः खेलन्ति | गुरवः बोधयन्ति | मुनयः ध्यायन्ति |
| वायुः कश्मलं हरति | रामः रावणं संहरति | योधः शत्रुं प्रहरति |

## अष्टमः पाठः

| | | |
|---|---|---|
| **अयम्** | **इयम्** | **इदम्** |
| **मम** | **तव** | **तस्य** |

| | | |
|---|---|---|
| अयं करः | अयं मम करः | करेण स्पृशामि |
| अयं पादः | इमौ मम पादौ | पादाभ्यां धावामि |
| इयं नासिका | इयं मम नासिका | नासिकया जिघ्रामि |
| इयं रसना | इयं तव रसना | रसनया रसयसि |
| इदं नेत्रम् | इमे तव नेत्रे | नेत्राभ्यां पश्यसि |
| अयं कर्णः | इमौ तस्य कर्णौ | कर्णाभ्यामाकर्णयति |
| अयं नखः | इमे तस्य नखाः | नखैः दारयति |
| अयं केशः | इदं चर्म | सा अङ्गुली |

सीता अङ्गुलीभिः केशं भूषयति

व्याधः व्याघ्रस्य चर्म आनयति । बालः करेण मुखं मार्जयति ।

## नवमः पाठः

# अहं त्वं सः सा तत्

अहं पश्यामि । आवां पश्यावः । वयं पश्यामः ।
त्वं पश्यसि । युवां पश्यथः । यूयं पश्यथ ।
सः पश्यति । तौ पश्यतः । ते पश्यन्ति ।
सा गच्छति । ते गच्छतः । ताः गच्छन्ति ।
तत् पतति । ते पततः । तानि पतन्ति ।

अयं मम पिता । इयं मम माता । सः मम भ्राता ।
इमे तव गुरवः । इयं तस्याः सखी । तत् तस्य पुस्तकम् ।

रामः दशरथस्य पुत्रः । सीता रामस्य भार्या ।
लक्ष्मणः तस्य अनुजः । रामः भरतस्य अग्रजः ।

इयं मम अनुजा । सा तस्य अग्रजा ।

द्रौपदी द्रुपदस्य पुत्री ।

## दशमः पाठः

# कः का किम् कुत्र क्व
# अद्य श्वः परश्वः पूर्वेद्युः

| | |
|---|---|
| अयं कः ? | अयं मम सखा । |
| युवां क्व गच्छथः ? | आवां पाठशालां गच्छावः । |
| इयं का ? | इयं मम सखी । |
| किं तस्याः नाम ? | शारदा इति तस्याः नाम । |
| इदं कस्य वस्त्रम् ? | इदं तस्य वस्त्रम् । |
| कुत्र वस्त्रं क्षालयति ? | तटाके वस्त्रं क्षालयति । |
| सः किं करोति ? | सः पुस्तके लिखति । |
| त्वं किं करोषि ? | अहं जलं पिबामि । |
| अहं किं करोमि ? | त्वं चित्रं पश्यसि । |

अद्य सोमवासरः । श्वः मङ्गलवासरः । परश्वः बुधवासरः ।

ततः गुरुवासरः । ततः परं शुक्रवासरः ।
पूर्वेद्युः भानुवासरः । पूर्वतरेद्युः शनिवासरः ।

इमे सप्त वासराः ।

## एकादशः पाठः

| | |
|---|---|
| १. एकं दैवम् | ६. षट् ऋतवः |
| २. द्वे नेत्रे | ७. सप्त ऋषयः |
| ३. त्रीणि लिङ्गानि | ८. अष्ट गजाः |
| ४. चत्वारि युगानि | ९. नव ग्रहाः |
| ५. पञ्च पाण्डवाः | १०. दश दिशः |

प्रथमम्, द्वितीयम्, तृतीयम्, चतुर्थम्, पञ्चमम्, षष्ठम्,
सप्तमम्, अष्टमम्, नवमम्, दशमम्

| | | |
|---|---|---|
| प्रथमं पुस्तकम् | प्रथमः पाठः | प्रथमा कक्ष्या |
| एकं फलम् | एकः शुकः | एका नदी |

तत्र एकं गृहमस्ति । गृहे द्वौ बालौ स्तः । अङ्गणे त्रयः वृक्षाः सन्ति । प्रथमः नारिकेलः । द्वितीयः आम्रः । तृतीयः पनसः । इतः पञ्चमे मासे परीक्षा चलति । तदा बहवः छात्राः आगच्छन्ति । अहं प्रथमायां कक्ष्यायां पठामि । मम भ्राता तृतीयायां कक्ष्यायां पठति ।

संस्कृते कति वचनानि ? त्रीणि ।

तानि कानि ? एकवचनं द्विवचनं बहुवचनञ्च ।

संस्कृते कति विभक्तयः ? सप्त ।

ताः विभक्तयः काः ?

प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी चेति ।

संबोधनविभक्तिः प्रथमाविभक्तिरेव ।

## द्वादशः पाठः

# पाठशाला




अहं प्रातः उत्तिष्ठामि । ततः मुखं मार्जयामि । वस्त्राणि क्षालयामि । ततः स्नानं करोमि । अनन्तरं देवं भजामि । क्षीरं पीत्वा पाठं पठामि । भोजनं कृत्वा पाठशालां गच्छामि । मया सह सीता गोविन्दश्च आगच्छतः । वयं पुस्तकानि लेखनीञ्च नयामः । पाठशालायां गुरुः अस्मान् बोधयति । प्रतिदिनं पाठक्रमः विभिन्नः भवति । अस्मिन् दिने संस्कृतं, गणितं, विज्ञानञ्च पठनीयमस्ति ।

कक्ष्यायां पीठेषु उपविश्य लेखन्या लिखामः । सायङ्काले क्रीडामः । क्रीडित्वा क्रीडाङ्गणात् गृहमागच्छामः ।

पाणी पादौ च क्षालयित्वा पुनः देवं भजामि । रात्रौ भुक्त्वा अहं पुनः पठामि । पठित्वा निद्रामि । एषा मम दिनचर्या ।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥

---

## अभ्यासः

त्वं कदा उत्तिष्ठसि? त्वया सह कौ आगच्छतः? कः युष्मान् बोधयति? यूयं कदा क्रीडथ? कदा निद्रासि? वस्त्राणि कः क्षालयति ॥

## त्रयोदशः पाठः

# कपयः



कपयः वनेषु वसन्ति । ते वृक्षमारोहन्ति, वृक्षेभ्यः अवरोहन्ति च । ते वृक्षात् वृक्षमुत्पतन्ति । फलानि भक्षयन्ति । तेषां लाङ्गूलानि दीर्घाणि सन्ति । तेषां देहस्य वर्णः धूम्रः, मुखस्य तु रक्तः । ते कदाचित् नगरमागच्छन्ति गृहाणामुपरि उपविशन्ति । आपणान् गत्वा फलानि मोदकानि च चोरयन्ति । वेगेन धावन्ति । आपणिकः तान् अनुधावति । कपयस्तु वृक्षान् गृहाणि वा आरोहन्ति । आपणिकः कोपात् लोष्टं

क्षिपति । कपयः आपणिकं वीक्ष्य चेष्टां कुर्वन्ति । तदा वयं हसामः । कपिः, वानरः, शाखामृगः इति पर्यायपदानि ।

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥

---

## अभ्यासः

१. इमानि वाक्यानि पूरयत :—

कपयः वने ........ । ते वृक्षेभ्यः ........ । ते ........ आरोहन्ति । कपयः फलानि ........ । आपणिकः कपीन् ........ ।

२. एषामर्थभेदान् दर्शयत :—

रोहति–आरोहति–अवरोहति, विशति–उपविशति, धावति–अनुधावति, गच्छति–आगच्छति ॥

३. युक्तरूपेण उपरितनेष्वन्यतमेन क्रियापदेन वाक्यानि पूरयत :—

बालः ........ । कपिः वृक्षम् ........ । कपिः वृक्षात् ........ । राजपुरुषः चोरम् ........ । सीता भूमौ ........ ॥

## चतुर्दशः पाठः

# त्रयः मीनाः



## पाशः जालम् परेद्युः आलस्यम्

एकस्मिन् कासारे त्रयः मीनाः वसन्ति। आनन्देन ते जले सञ्चरन्ति। कश्चन दाशः मित्रैः सह तत्र आगच्छति। सः एवं वदति "श्वः जालमानेष्यामः। मीनान् गृहीत्वा गृहं नेष्यामः" इति। इदं वचनं मीनाः आकर्णयन्ति। तेषु एकः मीनः भणति "अहमत्र न तिष्ठामि। अन्यत्र गमिष्यामि" इति। सः शीघ्रं जलद्वारेण अन्यत्र गच्छति। द्वितीयः

ब्रवीति "श्वः प्रातः अहं गमिष्यामि। श्वः खलु दाशः आगमिष्यति ? त्वरा कुतः ?" इति। सः परेद्युः अन्यत्र याति। तृतीयः चिन्तयति "यथा दैवमस्ति तथा भविष्यति। श्रमेण किं प्रयोजनम् ? अहमत्रैव स्थास्यामि" इति। सः कुत्रापि न चलति। परेद्युः प्रातः दाशः जालं गृहीत्वा आयाति। सः जालेन तं मीनं गृहीत्वा गृहं नयति। आलस्यं विपदं जनयति। अतः प्राज्ञाः अलसाः न भवन्ति।

मीनस्य मत्स्यः, झषः, अनिमिषः इति पर्यायपदानि भवन्ति।

चिन्तनीया हि विपदामादावेव प्रतिक्रिया।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे॥

---

अभ्यासः

१. मीनाः कुत्र वसन्ति ? दाशः किं वदति ? तृतीयः मीनः किं चिन्तयति ? अनेन पाठेन किं बोधथ ?

२. अस्मिन् पाठे बहुवचनान्तानि नामपदानि क्रियापदानि च दर्शयत॥

पञ्चदशः पाठः

# संभाषणम्

| | |
|---|---|
| कटः | पेटिका |
| निकटम् | प्रकोष्ठः |

शङ्करः :—मित्र, आगच्छ । अस्मिन् कटे निषीद ।

गोविन्दः :—शङ्कर, किं तवाग्रजः गृहे वर्तते ?

शङ्करः :—नहि, स इदानीमापणं गतः । अपि वक्तव्यमस्ति किञ्चित् ?

गोविन्दः :—मम भ्रातुरेकं पुस्तकं तवाग्रजस्य निकटे वर्तते । तत् पुस्तकं नेतुमहमागच्छम् ।

शङ्करः :—तस्य पुस्तकस्य किं नामधेयम् ?

गोविन्दः :—रामायणम् ; देवनागरीलिप्या मुद्रितम् ।

शङ्करः :—अहो, अस्ति । अहमेव दास्यामि । किं त्वं रामायणस्यार्थं बोधसि ?

गोविन्दः :—नहि, ममाग्रजो बोधति । सः तत्रत्यान् श्लोकान् पठति । पठित्वा तेषामर्थान् कथयति ।

शङ्करः :— कः रामायणस्य कविः ?

गोविन्दः :—वाल्मीकिमहर्षिः ।

शङ्करः :—तव गृहे के के रामायणमाकर्णयन्ति ?

गोविन्दः :—मम माता, पिता, अग्रजा, अहं, ममानुजश्च ।

शङ्करः :—भवतु, प्रकोष्ठे पेटिकायां तत् पुस्तकं विद्यते । आनीय यच्छामि । (यच्छति)

गोविन्दः :—इदानीमहं गमिष्यामि । तव भ्रात्रे पुस्तकस्य वृत्तं निवेदय ।

शङ्करः : - तिष्ठ तावत् । इदं क्षीरं पिब ।

गोविन्दः :--एवम् । (पिबति)

शङ्करः :—अहमपि रामायणं श्रोतुमिच्छामि ।

गोविन्दः :—तर्हि प्रतिदिनं सायमागच्छ । अतीव मधुरं रामायणम् । इदं महाकाव्यमिति पण्डिताः कथयन्ति ।

शङ्करः :—इतः परं प्रतिसायमागमिष्यामि ।

गोविन्दः :—महान् संतोषः । अहं गच्छामि । नमस्ते ।

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

---

## अभ्यासः

१. गोविन्दः शङ्करस्य गृहं कुत अगच्छत्? गोविन्दस्य गृहे के के रामायणमाकर्णयन्ति? शङ्करः गोविन्दस्य गृहं कुतो गन्तुमिच्छति? रामायणस्य कविः कः?

२. एषां पर्यायपदानि लिखत :—

अस्ति, गच्छति, निषीदति, कथयति ॥

षोडशः पाठः

# प्राणिवर्गः



## १. वृषभः

जनानामुपकारिणः बहवः प्राणिनः सन्ति । तत्र वृषभः एकः । अयं हलं कर्षति । शकटं वहति । भारवहनाय दूरगमनाय च ग्रामेषु शकटं मुख्यं साधनम् । वृषभेण कृषीवलानां महान् उपयोगो विद्यते । अयं धीरः दृढकायश्च पशुः । एषः गम्भीरं नदति । गौः, बलीवर्दः, ऋषभः इति अस्य नामान्तराणि वर्तन्ते ।



# २. अश्वः

अश्वः ह्रेषते। अस्य पुच्छं दीर्घं न भवति। अपि तु ह्रस्वम्। अयं वृषभ इव धीरः। शीघ्रं धावितुमेषः प्रभवति। अश्वस्य खुराः कठिनाः सन्ति। एते खुराः छिन्नाः न भवन्ति। गर्दभस्यापि खुराः एवमेव। गर्दभस्य बुद्धिः मन्दा। अश्वस्य तु तीक्ष्णा। हयाः रथान् वहन्ति। योधाः अश्वानारुह्य युध्यन्ते। रजकाः गर्दभैः वस्त्राणि वाहयन्ति। गर्दभः विकृतेन स्वरेण रटति। अश्वस्य हयः वाजी तुरङ्गम इति नामान्तराणि वर्तन्ते। गर्दभः रासभः खरः इति पर्यायपदानि।



## ३. शुनकः

जनाः शुनकं पालयन्ति। कुतः ? सः गृहं रक्षति। यदि अपरिचितः चोरो वा आगच्छति, तर्हि शुनकः भषति। सः अन्नं रोटिकां मांसञ्च भक्षयति। अस्य लाङ्गूलं सदा वक्रम्। एतस्य दन्ताः निशिताः विद्यन्ते। शुनकाः विविधवर्णाः संभवन्ति। केचित् श्वेताः, केचित् कृष्णाः, केचित् कपिशाः, केचित् चित्रवर्णाः। केषाञ्चन रोमाणि दीर्घाणि सुन्दराणि च भवन्ति। इमं सारमेयः, कुक्कुरः, श्वा इत्यपि वदन्ति।



# ४. मार्जालः

मार्जालः प्रायेण गृहेषु संचरति। इमं बिडाल इत्यपि वदन्ति। अस्य नखानि तीक्ष्णानि सन्ति। अन्धकारेऽपि मार्जालः वस्तूनि द्रष्टुं प्रभवति। अयं मूषकान् मारयति खादति च। क्षीरमस्मै बहु रोचते। दध्यपि अस्य प्रियम्। बिडालस्य अपत्यानि सुन्दराणि। तैः सह बालकाः क्रीडन्ति। शुनकात् बिडालः त्रस्यति। यदा शुनकः तमनुधावति, तदा सः गृहमारुह्य उपविशति।



## ५. कुक्कुटः

कुक्कुटः पक्षिणां वर्गे अन्तर्भवति। अयमपि कदाचित् डयते। अस्य पक्षौ न दृढौ। अतः दूरं डयितुं कुक्कुटः न प्रभवति। सूर्योदयात् पूर्वमुषःकाले कुक्कुटः रौति। तदा कृषीवलाः उत्तिष्ठन्ति। कुक्कुटस्य स्त्री कुक्कुटी। कुक्कुटी अण्डानि सूते। अपत्यैः सह कुक्कुटी धान्यानि कीटांश्च उञ्छति भक्षयति च।

एवं धेनुः, अजः, अजा, मेषः, मेषी, महिषः, महिषी इत्यादीन् पशून् मयूरः, कपोतः, शुकः इत्यादीन् पक्षिणश्च जनाः पोषयन्ति।

---

## अभ्यासः

१. इमानि वाक्यानि पूरयत :—

वृषभः गम्भीरं ........ । अश्वः ........ । कुक्कुटः ........ । शुनकः ........ । बिडालः मूषकान् ........ ........ । कुक्कुटः दूरं ........ ........ प्रभवति । शुनकस्य ............ वक्रम् । योधाः अश्वान् ........ ........ ।

२. पर्यायपदानि लिखत :—

अश्वः........ , गर्दभः........ , वृषभः........ , मार्जालः........ , शुनकः ........ ........ ॥

३. एषां लिङ्गवचनविभक्तीः वदत ।

मार्जालः, मूषकान्, दधि, वस्त्राणि, शकटम्, धेनुः, अश्वस्य, बुद्धिः

—

## सप्तदशः पाठः



# चतुरः शृगालः

एकस्मिन्नरण्ये कश्चित् सिंहः अवसत्। तस्य महती क्षुधाऽभवत्। इतस्ततः आहारार्थं स व्यचरत्। परन्तु सः किमपि नालभत। ततः काञ्चन गुहामपश्यत्। तां प्रविश्य तत्र शृगालस्य पदचिह्नान्यालोकत। "अत्र शृगालो निवसति। स यदा आगमिष्यति, तदाहं तं भक्षयिष्यामि" इत्यालोच्य तत्रैवास्वपत्।

रात्रौ शृगाल आगच्छत् । गुहायाः द्वारे सिंहस्य पदचिह्नानि दृष्ट्वा "अहो, इह सिंह आगतः । अन्तःस्थित इति तर्कयामि । का मे गतिः" इति भीतोऽभवत् । ततः कञ्चिदुपायमचिन्तयत् । "अरे गुहे ! प्रतिदिनं मामालोक्य 'आगच्छ ! आगच्छ !' इति मामाह्वयसि । अद्य तु किमपि न वदसि । कुत एतत् ?" इत्यक्रोशत् ।

शृगालस्य कपटोपायं सिंहो नाबोधत् । "अहमेव तथा वदामि । तदा शृगालोऽयमन्तरागमिष्यति" इत्यालोच्य, स सिंहः "आगच्छ, आगच्छ !" इत्युच्चैरगर्जत् । तदा सिंहः अन्तस्तीष्ठतीति शृगालेन ज्ञातम् । चतुरः सः पलायनमकरोत् ।

शृगालः गोमायुः, फेरव इति च उच्यते । सिंहस्य कण्ठीरवः, मृगराजः, केसरी इति च नामान्तराणि विद्यन्ते ।

---

### अभ्यासः

१. सिंहः गुहां कुतः प्राविशत् ? शृगालः कुतः भीतोऽभवत् ? सिंहः गुहायामस्तीति शृगालः कथमबोधत् ? सिंहस्य कानि नामान्तराणि ?

२. एषामर्थभेदं लिखत :—

पश्यति, अपश्यत्, पश्य; क्रोशति, अक्रोशत्, क्रोश; क्रीडति, अक्रीडत्, क्रीड; आगच्छति, आगच्छत्, आगच्छ।

३. एषु पदच्छेदं कृत्वा सन्धिनामानि निर्दिशत।

सिंहोऽवसत्, क्षुधाऽभवत्, चिह्नान्यालोक्य, तत्रैव, इत्यालोच्य, शृगालोऽयम्।

---

## अष्टादशः पाठः

# मार्जालयोः कलहः



एकस्मिन् ग्रामे द्वौ मार्जालौ अवसताम् । मित्रभूतौ तौ गृहे गृहे चरित्वा दधिक्षीरादिकमचोरयताम् । कदाचित् ताभ्यां किमपि न लब्धम् । महता यत्नेन किमपि खाद्यमन्विष्यन्तौ पृथुलं मोदकमपश्यताम् । तयोरन्यतरः बिडालः तं मुखेन धृत्वा गृहाद् बहिरधावत् । अन्यः तमन्वसरत् । उद्याने किमपि विविक्तं स्थानं तौ प्राप्तवन्तौ । कस्यचित् वृक्षस्य छायायामुपविश्य तं मोदकं विभक्तुं प्रारभेताम् । स च दन्तैः द्विधा खण्डितः ।

प्रथमः मार्जालः :—इदानीं भक्षयावः ।

द्वितीयः मार्जालः :—नहि नहि । मदीयो भागः अल्पतरः वर्तते । तव भागात् किञ्चिन्मे देहि ।

प्र. मा. :—नैव शक्यम् । अहं मोदकमपहृत्य आनीतवान् । किमपि न यच्छामि मदीयादंशात् ।

द्वि. मा. :—कुतो न यच्छसि ? बलादपहरामि । मयैव अयं मोदकः प्रथमं दृष्टः ।

प्र. मा. :—मया तु आनीतः । अतोऽहं किञ्चिदधिकं प्राप्तुमर्हामि ।

द्वि. मा. :—अहं द्वारदेशे स्थित्वा त्वां रक्षितवान् । तस्मात् समभागमेव गृह्णामि ।

एवं कलहायमानौ तौ महता रोषेण अन्योन्यमभ्यद्रवताम् । नखैर्दन्तैश्च परस्परं पीडयन्तौ रोमाणि अलुञ्चताम् । घुर्घुरध्वनिमकुरुताम् । तयोः कलहः वृक्षस्थेन केनचित् वानरेण दृष्टः । सः वृक्षादवतीर्य अवदत् "भोः किमर्थमेवं कलहायेथे ? युवयोर्युद्धं मा भूत् । अहमिदानीं विवादं निर्णयामि । अनया तुलया मोदकखण्डं तोलयामि । निपुणोऽस्मि न्यायनिर्णये" इति ।

तदा तौ बिडालौ कलहान्निवृत्तौ। वानरेण धृतायास्तुलायाः पात्रयोः मोदकखण्डौ अस्थापयताम्। एकतरं पात्रमधो गच्छद् वीक्ष्य न्यायप्रियो वानरः "पश्यतम्। एकः खण्डो लघुः, अन्यो गुरुः। इदानीं समानौ करिष्यामि" इत्यभाषत। ततः गरीयसः खण्डात् किञ्चिन्मोदकांशं मुखे निक्षिप्य पुनरतोलयत्। "अहो, अयं द्वितीयो भागः इदानीं गुरुर्जातः। नैतद्युक्तम्" इति अवदत्। ततः अन्योऽपि मोदकांशः सानन्दं तेन भक्षितः। पुनरपि तुलां स वञ्चकोऽधारयत्। अन्यः खण्डः लघीयान् जातः। तस्मिन्नवसरे तुलापात्रे अल्पमेवावशिष्टं मोदकं वीक्ष्य मार्जालौ चिन्ताकुलौ जातौ। तौ न्यायाध्यक्षमुद्दिश्य "भोः दीयतामवशिष्टम्। भवतो निर्णयेन आवां सन्तुष्टौ" इति अयाचेताम्। तदासौ कपिः "साधु भोः साधु! किञ्चिद् वेतनं दीयतामस्मभ्यम्, यदि युवां सन्तुष्टौ। इमौ मोदकखण्डौ वेतनमस्माकं भवितुमर्हतः" इत्युक्त्वा, तौ खण्डौ मुखे निक्षिप्य सत्वरं वृक्षमारोहत्। तौ बिडालौ नितरां विषण्णौ परस्परं निन्दन्तौ निर्गतौ।

---

## अभ्यासः

१. मार्जालौ किमपश्यताम्? तौ कुत्र गतौ भक्षणार्थम्? वानरः किमर्थं वृक्षादवातरत्? सः मोदकं तुलया किमकरोत्?

२. वाक्यानि पूरयत :—

मार्जालौ मोदकं विभक्तुं ............ । मदीयः भागः ........ वर्तते । किमर्थं युवां ............ । एकः खण्डः ............, अन्यः ........ ।

३. एषामर्थाः अधीयन्ताम् :—

मदीयः, त्वदीयः, अस्मदीयः, युष्मदीयः, भवदीयः ।

### एकोनविंशः पाठः

## संमिश्रवाक्यानि

अद्य सोमवासरः। जातस्य मम दशमो वत्सरोऽयम्। प्रतिपदि न पठेदिति प्राचीनानां संप्रदायः। ईश्वरस्य जननं मरणञ्च न स्तः। सर्वेष्ववयवेषु शिरः प्रधानम्। तापसो जटां धारयति। नार्यो ललाटे तिलकं धारयन्ति। मम पादे रुजा विद्यते। कण्टकस्य वेधनेन क्षतं जातम्। व्यधिभिः शरीरं कृशं जायते। गोमयं परिशुद्धमिति भारतीयाः मन्यन्ते। वृषभः पृष्टेन गोणीं वहति। वम्रयः पुस्तकानि खादन्ति। पिपीलिकाः पंक्तिशः गच्छन्ति। गृहाणां भित्तयः इष्टकाभिः निर्मीयन्ते। रामः प्रथमकक्ष्यायामधीते। गृहे वातसंचारार्थं गवाक्षाः क्रियन्ते। शारदा केशान् कङ्कतेन प्रसाधयति। कर्मकरः आम्रफलं छुरिकया कर्तयति। अस्मिन् क्षणे विस्मृतं खलु मया। किं वा तूष्णीमास्ते भवान्? किमपि हृदये कृत्वा अन्यत् किमपि जल्पसि। वक्तुं सुकरम्, दुष्करं कर्तुम्।

न हि सर्वः सर्वं जानाति । किं त्वं स्वयं नष्टः परान् नाशयितु-मिच्छसि ? भगवन्, अभिवादये ।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयात् एष धर्मः सनातनः ॥

---

## अभ्यासः

१. इमानि वाक्यानि पूरयत :—

............ प्राचीनानां संप्रदायः । तापसः जटां ............ ।

............ पुस्तकानि खादन्ति । ............ पंक्तिशः गच्छन्ति ।

शारदा ............ कङ्कतेन ............ । आम्रफलं छुरिकया ............ ।

---

## विंशः पाठः

# श्रीहर्षः

पुरा स्थाणेश्वरे श्रीहर्षवर्धनो राज्यमपालयत्। सः बाल्ये यौवने च बहून् क्लेशानन्वभवत्। पिता प्रभाकरवर्धनः अम्रियत। माता पत्युः चितामधिरुह्य सहगमनमकरोत्। ततो ज्येष्ठं भ्रातरं राज्यवर्धनं कश्चन सामन्तराजः वञ्चयित्वा अघातयत्। सोदर्याः राज्यश्रियः पतिः शत्रुणा सह युद्धं कृत्वा प्राणानत्यजत्। राज्यश्रीः महता दुःखेन विमूढा वनमगच्छत्। एवं क्लेशपरंपरां प्राप्तोऽपि श्रीहर्षः धैर्यं नामुञ्चत्। धीरो वीरः श्रीहर्षः "सर्वानपि शत्रून् जेष्यामि" इति प्रतिज्ञां कृत्वा महता सैन्येन सहितः दिग्विजयाय प्रातिष्ठत। नृपानजयत्। शत्रूनध्वंसयत्। अरण्ये सोदरीं राज्यश्रियं लब्ध्वा तया सह राजधानीमागच्छत्। वैभवेन सिंहासनमारोहत्।

भारतदेशस्य इतिहासे श्रीहर्षः प्रसिद्धो राजा। सः धर्मेण प्रजाः अपालयत्। सर्वेऽपि जनाः सुखिनोऽभवन्। धार्मिकोऽयं

नृपालः सर्वान् धर्मान् समदृष्ट्या अपोषयत् । वैदिकमतं बौद्धमतञ्च तस्य काले अवर्धेताम् । श्रीहर्षः पण्डितानां कवीनाञ्च महानाश्रयोऽभवत् । तस्य आस्थानकविषु बाणकविः प्रसिद्धः । बाणस्य कृतिषु कादम्बरी, हर्षचरितञ्चेति काव्यद्वयं प्रसिद्धम् । हर्षचरिते बाणः श्रीहर्षस्य वृत्तमवर्णयत् । श्रीहर्षो निपुणः कविः । नागानन्दम्, रत्नावली, प्रियदर्शिका चेति नाटकत्रयं स्वयमरचयत् । श्रीहर्षवर्धनस्य शासनसमये संस्कृतभाषा सर्वतः समवर्धत ।

---

## अभ्यासः

१. श्रीहर्षस्य भ्राता कथमम्रियत? राज्यश्रीः कुतो वनमगच्छत्? हर्षचरितं कोऽरचयत्? श्रीहर्षेण कानि नाटकानि प्रणीतानि?

२. एषां पर्यायपदानि लिखत :—

भ्राता, क्लेशः, राजा, अपालयत्, अमुञ्चत्, प्रातिष्ठत ।

---

## एकविंशः पाठः

# भारतदेशः



भारतदेशोऽयमस्माकं जन्मभूमिः । अयं देशः विद्यायाः संस्कृतेरैश्वर्यस्य च पुरातनकालेऽपि प्रसिद्धिमलभत । भारतीयाः द्वीपान्तराणि गत्वा वाणिज्यं कुर्वन्त आसन् । वैद्यके, गणिते, शिल्पे तथा अन्येष्वपि शास्त्रेषु प्रवीणा अभवन् । वयं श्रीमन्तो विद्वांसश्च अभवाम । एवं महिमान्वितोऽयं देशः कदाचित् पराधीनो जातोऽपीदानीं स्वतन्त्रो राजते ।

इदानीं भारते वयं विज्ञाने, वाणिज्ये, कृषौ च कौशल-मधिकमपेक्षामहे । एषु विषयेषु पाश्चात्याः कुशलतराः भवन्ति ।

अस्माकं राष्ट्रे दारिद्र्यमज्ञानञ्च विशेषेण वर्तते । यत्राज्ञानं तत्र दारिद्र्यम् भवत्येव ।

अस्य सर्वस्यापि दोषस्य किं कारणं भवेत् ? आलस्यं प्रमुखं कारणमिति विज्ञाः मन्यन्ते । आलस्यमस्मासु यदि न विद्येत, तर्हि सर्वोऽपि धनी पण्डितश्च संपद्येत । अतः सर्वेऽपि छात्राः आलस्यं परित्यज्य विद्यामभ्यस्येयुः । संस्कृते, प्राचीन-शास्त्रेषु च गौरवबुद्धिं दर्शयेयुः । सर्वा अपि प्रजाः स्वकर्तव्येषु श्रद्धां प्रकटयेयुः । अन्तःकलहं जातिद्वेषञ्च हित्वा राष्ट्राभिमानेन वर्तेरन् । "लोकाः समस्ताः सुखिनो भवन्तु" इत्याशयेन यदा वयं कार्यनिरताः भवेम, तदा राष्ट्रमिदं पुनरपि जगति महतीं कीर्तिं प्रतिष्ठाञ्च विन्देत । ऐश्वर्येण विद्यया च विराजेत ।

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥

## अभ्यासः

१. भारतदेशः महिमान्वित आसीदित्यत्र त्रीणि प्रमाणानि दर्शयत। केषु विषयेषु पाश्चात्याः कुशालतराः? अस्माकं प्रमुखो दोषः कः? भारतराष्ट्रं पुनः समृद्धं कथं भवेत्?

२. इमान् शब्दान् उपयुज्य वाक्यानि रचयत :—

वाणिज्यम्, आलस्यम्, यत्र-तत्र, यदा-तदा।

३. एषामेकवचनान्तानि रूपाणि लिखत :—

कुर्वन्तः, अभवाम, अभ्यस्येयुः, शत्रून्, भवेम, अस्मासु।

द्वाविंशः पाठः

# महात्मा गान्धिः



भारतदेशे पूर्वं बहवः महात्मानः अजायन्त । तेषु महात्मा गान्धिः सुप्रथितः । अयं सद्गुणैः सदाचारैश्च भूतले सर्वेषामपि संमान्य आसीत् । भारतस्य पराधीनतां दीनताञ्च दृष्ट्वा नितरां व्यषीदत् । आङ्ग्लविद्यायां पारङ्गतोऽयं देशसेवायां निरतोऽभवत् । अस्य राष्ट्रस्य स्वातन्त्र्यं संपादयितुं बहुधा प्रयत्नमकरोत् । प्रजानामैकमत्यं बोधयित्वा देशभक्तिमुपादिशत् । अस्य संततेन परिश्रमेण जनानां नवीनः कार्योत्साहः, देशाभिमानः, स्वतन्त्रतायामभिलाषश्च समजायन्त ।

अस्य महापुरुषस्य सततोद्योगेन राष्ट्रमस्माकं स्वतन्त्रमभवत् । आङ्ग्लाः इमं देशं विसृज्य निरगच्छन् ।

महात्मनो गान्धिमहोदयस्य दीनेषु महानादरः, रोगिषु महती दया, प्राणिषु महत् प्रेम च नित्यमासन् । ईश्वरे भक्तिः, सत्ये श्रद्धा, अहिंसायां विश्वासः, कार्ये दक्षता च नितरामवर्तन्त । स्वसुखमपि परित्यज्य सर्वदा लोककल्याणाय प्रायतत ।

अयं महोदयः पितेव राष्ट्रस्य हितमकरोत् । तस्माद्वयं गान्धिमहाशयं राष्ट्रपितेति संमानयामः । इमं महात्मानं विस्मर्तुं कदापि नार्हामः । वर्धतां भारतदेशः । विजयतां भारतदेशः ।

---

## अभ्यासः

१. महात्मा गान्धिः कुतो व्यषीदत् ? सः प्रजानां किमुपादिशत् ? इमं राष्ट्रपितेति कुतः संमानयामः ? अस्य महात्मनः प्रथितान् गुणान् संगृह्णीत ।

२. पदानि विच्छिद्य संधिनामानि निर्दिशत ।

महात्मा, पारङ्गतोऽयम्, कार्योत्साहः, देशाभिमानः, पितेव ।

३. एषामेकवचनान्तानां बहुवचनान्तानि, बहुवचनान्तानामेकवचनान्तानि च रूपाणि दर्शयत ।

व्यषीदत्, आसन्, समजायन्त, प्रायतत, अर्हामः, वर्धताम्, पिता, प्रेम, महात्मा, भक्तिः ।

---

### त्रयोविंशः पाठः

## रुग्णः बधिरश्च

एकस्मिन् नगरे कश्चिद्वणिगासीत् । कदाचिदसौ ज्वरपीडितोऽभवत् । तस्यैको बधिरः सुहृत् वणिजः अस्वास्थ्यं ज्ञात्वा तस्य देहस्थितिं विचारयितुमैच्छत् । सः रुग्णस्य वणिजो भवनं गच्छन्नेवमचिन्तयत् । "अहं तत्र गत्वा 'भोः, तव देहस्थितिः कीदृशी ?' इति पृच्छेयम् । 'किञ्चिदनुकूला' इति सः प्रतिवदेत् । ततः 'किमौषधं सेवसे ? कश्च भवतो वैद्यः ?' इति प्रक्ष्यामि । 'इदमौषधम्, अमुको वैद्यः' इति स वदिष्यति । 'अस्त्वेवम्, ईशस्य कृपया वैद्यस्य श्रमः सार्थको भवतु' इत्याशास्य आगमिष्यामि" इति ।

स बधिरः आतुरस्य वणिजो गृहं प्राप्य समीपे निषण्णः सन्नेवमपृच्छत् ।

बधिरः :—आर्य, तव देहस्थितिः कथं वर्तते ?

वणिक् :—ज्वरो मां भृशं बाधते ।

बधिरः :—साधु साधु ! महान् संतोषः । एवमेव भवतु ।

तद्वचनं श्रुत्वा वणिगसौ संरब्ध आसीत् । तदा बधिरः "किमौषधं भवान् सेवते ? को भवतश्चिकित्सकः ?" इत्यपृच्छत् । "मृत्पिण्डं ममौषधम् । यमो मे चिकित्सकः" इति रुग्णः प्रत्यब्रवीत् । स बधिरः "सम्यगस्ति तदौषधम् । निपुणोऽयं चिकित्सकः" इत्यवोचत् । कुपितः स वणिक् "अपगच्छ त्वम् । नरकं पत" इत्यक्रोशत् । बधिरस्तु आसनादुत्तिष्ठन् "अस्त्वेवम् । भगवतः कृपया तवेच्छा सिध्यतु । तव चिकित्सकस्य श्रमः सार्थको भवतु" इति वदन् तद्गृहान्निर्गतः ।

---

## अभ्यासः

१. एषां पर्यायपदानि लिखत :—

नगरम्, गृहम्, वैद्यः, देहः, निपुणः, रुग्णः ।

२. वाक्यानि पूरयत :—

त्वमौषधं ........ । भवानौषधं ........ । तव देहस्थितिः ............ । भगवतः ........... इच्छा ............ ।

३. वर्तमानकालार्थे एषां रूपाणि कीदृशानि ?

आसीत्, ऐच्छत्, प्रक्ष्यामि, अब्रवीत् ।

४. भूतकालार्थे एषां रूपाणि कीदृशानि ?

भवतु, सेवसे, आगमिष्यामि, बाधते ।

---

चतुर्विंशः पाठः

# छान्दसानां कविता

पुरा धारानगरे भोजो नाम संस्कृतभाषाप्रियः भूपतिः राज्यमपालयत् । तस्य आस्थाने बहवो विद्वांसः कवयश्च अवर्तन्त । भोजः स्वयं पण्डितः काव्यज्ञः कविश्च अभूत् । चम्पूरामायणं नाम मनोज्ञं काव्यं भोजेन प्रणीतम् । सः राजा कवीन् विशेषेण पुरस्कृत्य तेभ्यः पुष्कलं धनं प्रयच्छतीति कीर्तिः सर्वत्र प्रसृता आसीत् । राजसभायां कालिदासादयः बहवः कवयः व्यराजन्त ।

राजानं कवित्वप्रियं ज्ञात्वा केचित् छान्दसाः धारानगरमागच्छन्। ते श्रुतिस्मृत्यादिषु प्रवीणाः, परं कवित्वे न कुशलाः। ते वैदिकाः नगरस्थं भुवनेश्वरीमन्दिरं गत्वा 'कवित्वं करिष्यामः' इत्युपविष्टाः। चिरमालोच्य तेष्वन्यतमः श्लोकस्य प्रथमं पादमरचयत् 'भोजनं देहि राजेन्द्र' इति। ततो महता यत्नेन अन्यः द्वितीयं पादमेवमपूरयत् 'घृतसूपसमन्वितम्' इति। तदेवं तैः छान्दसैः प्रथमार्धं रचितम्। द्वितीयार्धं कथमपि नास्फुरत्। सर्वे चिन्ताकुलाः जाताः।

ततो देवताभवनं कालिदासः प्रणामार्थमायात्। सः वैदिकान् दृष्ट्वा तेषां वृत्तान्तमपृच्छत्। ते च स्वीयं वृत्तं निवेद्य स्वकृतं श्लोकार्धमदर्शयन्। 'उत्तरार्धं न स्फुरति' इति च अब्रुवन्। कालिदासः स्मित्वा उत्तरार्धमेवमब्रवीत् 'माहिषश्च शरच्चन्द्रचन्द्रिकाधवलं दधि' इति।

परेद्युः अमी छान्दसाः राजसभां प्रविश्य भोजराजस्य पुरतः इमं श्लोकमपठन्—

भोजनं देहि राजेन्द्र घृतसूपसमन्वितम्।
माहिषश्च शरच्चन्द्रचन्द्रिकाधवलं दधि॥

धारेश्वरो भोजः तत्पद्यमाकर्ण्य 'येन पूर्वार्धं निर्मितं तेन पुनः कदाचिदपि कवित्वे श्रमो न कर्तव्यः। उत्तरार्धस्य किञ्चिद्दातुमिच्छामि, न पूर्वार्धस्य' इत्युक्त्वा सुवर्णनिष्कान् दत्वा तान् विप्रान् व्यसर्जयत्।

कान् पृच्छामः सुराः स्वर्गे निवसामो वयं भुवि।
किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा॥

---

## अभ्यासः

१. धारानगरस्य को राजा? तस्य सभायां के के अवर्तन्त? वैदिकाः किमर्थं धारानगरमागच्छन्? पूर्वार्धस्य पारितोषिकं राजा कुतो नायच्छत्?

२. इमान् शब्दान् उपयुज्य वाक्यानि रचयत।
घृतम्, दधि, इच्छामि, कविः, धवलम्, प्रणामार्थम्।

---

पञ्चविंशः पाठः

# सुभाषितवाक्यानि

अजीर्णे भोजनं विषम् । अति सर्वत्र वर्जयेत् । अनाश्रया न शोभन्ते पण्डिता वनिता लताः । अल्पविद्यो महागर्वी । आचारः प्रथमो धर्मः । आलस्योपहता विद्या । कुवस्त्रता शुभ्रतया विराजते । क्रोधो मूलमनर्थानाम् । गतं न शोचयेत् प्राज्ञः । चिन्तासमं नास्ति शरीरशोषणम् । जातस्य हि ध्रुवो मृत्युः । दूरतः पर्वता रम्याः । द्रव्येण सर्वे वशाः । न च विद्यासमो बन्धुः । न सा सभा यत्र न सन्ति वृद्धाः । न हि सर्वविदः सर्वे । निःस्पृहस्य तृणं जगत् । परोपकाराय सतां विभूतयः । प्रारब्धमुत्तमजना न परित्यजन्ति । महाजनो येन गतः स पन्थाः । मौनिनः कलहो नास्ति । यतो धर्मस्ततो जयः । विनाशकाले विपरीतबुद्धिः । शरीरमाद्यं खलु धर्मसाधनम् । सहसा विदधीत न क्रियाम् । सत्यं कण्ठस्य भूषणम् ।

---

## षड्विंशः पाठः

# लङ्कादेवतापराजयः



अथ सा हरिशार्दूलं प्रविशन्तं महाबलम् ।
नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥ १

स्वयमेवोत्थिता तत्र विकृताननदर्शना ।
मुञ्चमाना महानादमब्रवीत् पवनात्मजम् ॥ २

कस्त्वं केन च कार्येण इह प्राप्तो वनालय ।
कथयस्वेह यत्तत्त्वं यावत् प्राणा धरन्ति ते ॥ ३

अथ तामब्रवीद्वीरो हनुमानग्रतः स्थिताम् ।
कथयिष्यामि ते तत्त्वं यन्मां त्वं परिपृच्छसि ॥ ४

का त्वं विरूपनयना पुरद्वारेऽवतिष्ठसे ।
किमर्थश्चापि मां रुद्ध्वा निर्भर्त्सयसि दारुणा ॥ ५

हनुमद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ।
उवाच वचनं क्रुद्धा परुषं पवनात्मजम् ॥ ६

अहं राक्षसराजस्य रावणस्य महात्मनः ।
आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् ॥ ७

स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुङ्गवः ।
आबभाषेऽथ मेधावी सत्ववान् प्लवगर्षभः ॥ ८

द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकारतोरणाम् ।
इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ॥ ९

तस्य तद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ।
भूय एव पुनर्वाक्यं बभाषे परुषाक्षरम् ॥ १०

मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिता ।
न शक्यमद्य ते द्रष्टुं पुरीयं वानराधम ॥ ११

ततः स हरिशार्दूलस्तामुवाच निशाचरीम् ।
दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ॥ १२

ततः कृत्वा महानादं सा वै लङ्का भयावहम् ।
तलेन वानरश्रेष्ठं ताडयामास वेगिता ॥ १३

ततः स कपिशार्दूलो लङ्कया ताडितो भृशम् ।
मुष्टिनाभिजघानैनां हनुमान् क्रोधमूर्छितः ॥ १४

सा तु तेन प्रहारेण विह्वलाङ्गी निशाचरी ।
पपात सहसा भूमौ विकृताननदर्शना ॥ १५

ततो वै भृशसंविग्ना लङ्का सा गद्गदाक्षरम् ।
उवाच गर्वितं वाक्यं हनुमन्तं प्लवङ्गमम् ॥ १६

प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम ।
निर्जिताऽहं त्वया वीर विक्रमेण महाबल ॥ १७

तत् प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम् ।
विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ॥ १८

— श्रीमद्वाल्मीकिरामायणम्

---

## अभ्यासः

१. लङ्काधिदेवता हनूमन्तं किमपृच्छत् ? हनूमान् किमुत्तरं प्रायच्छत् ? कुतोऽयमक्रुध्यत् ? क्रुद्धः किमकरोत् ? ततो लङ्का किमब्रवीत् ?

२. पदानि विच्छिद्य संधिनामानि वदत ।

कथयस्वेह, द्वारेऽवतिष्ठते, इत्यर्थम्, पुरीयम्, प्लवगर्षभः ।

३. एषां शब्दानां लिङ्गविभक्तिवचनानि वदत ।

वनालय, नगरीम्, भद्रे, कार्याणि, विक्रमेण, भूमौ ।

---

सप्तविंशः पाठः

# सुभाषितानि

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं दानं भूषणैः किं प्रयोजनम् ।। १

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैवकुटुम्बकम् ।। २

यथा चित्तं तथा वाचो यथा वाचस्तथा गिरः ।
चित्ते वाचि क्रियायाश्च साधूनामेकरूपता ।। ३

न दैवमिति संचिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्नुमर्हति ।। ४

पित्रोर्नित्यं हितं कुर्यादाचार्यस्य च सर्वदा ।
तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते ।। ५

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ।। ६

अकृत्वा परसंतापमगत्वा खलमन्दिरम् ।
अनुत्सृज्य सतां वर्त्म यत् स्वल्पमपि तद्बहु ॥ ७

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ८

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च पूजिताः ॥ ९

क्षणशः कणशश्चैव विद्यामर्थञ्च साधयेत् ।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम् ॥ १०

---

### अभ्यासः

१. एषां लिङ्गवचनविभक्तीः निर्दिशत ।

लघुचेतसाम्, वाचि, तिलेभ्यः, तेषु, वर्त्म, राजन्, पञ्च, विद्याम् ।

२. एषां प्रतिद्वन्द्विनः शब्दान् लिखत ।

सुलभः, पथ्यम्, दरिद्रता, विकृतम्, दुर्बुद्धिः, भृत्यः, बहु, सत्यम् ।

---

अष्टाविंशः पाठः

# चाटुश्लोकाः

अपदो दूरगामी च साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥
(पत्रलेखः)

भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः ।
विष्णुस्थानं कथं प्रोक्तं तक्रं शक्रस्य दुर्लभम् ॥

तृणाल्लघुतरस्तूलः तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥

कमले कमला शेते शिवः शेते हिमालये ।
हरिरम्बुनिधौ शेते मन्ये मत्कुणशङ्कया ॥

भारतं चेक्षुदण्डं च सिन्धुमिन्दुं च वर्णय ।
पादमेकं प्रदास्यामि प्रतिपर्वरसोदयः ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

—★—

# सन्धिप्रकरणम्

## यण्सन्धिः

संज्ञा :—स्वरः=अच्, व्यञ्जनम्=हल्, इ ई उ ऊ ऋ ॠ ऌ=इक्, य् व् र् ल्=यण् ।

१. इकः स्थाने यण् स्यादचि परे ।

उदा :—

अधि + अयनम् = अध्ययनम् , इत्यालोच्य, नद्युपयोगः ।

मधु + अरिः = मध्वरिः, गुर्वाज्ञा, वध्वागमनम् ।

पितृ + आदेशः = पित्रादेशः, मात्रीरितम् , भ्रात्रुक्तिः ।

## गुणसन्धिः

संज्ञा :— ए ओ अर् = गुणः

अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् ।

उप + इन्द्रः = उपेन्द्रः, रमेशः, गङ्गोदकम् , महर्षिः ।

## वृद्धिसन्धिः

संज्ञा :—ऐ औ आर् = वृद्धिः

ए ओ ऐ औ = एच्

२. अ) अवर्णादेचि परे वृद्धिरेकादेशः स्यात् ।

रामस्य + एव = रामस्यैव, गङ्गौघः, फलैक्यम् ।

आ) अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात् ।

उप + ऋच्छति = उपार्च्छति, प्रार्च्छति ।

## सवर्णदीर्घः

संज्ञा :—सवर्णः=सजातीयः, अआकारौ परस्परं सवर्णौ । तथा इईकारौ उऊकारौ ऋॠकारौ च परस्परं सवर्णौ । अ आ इ ई उ ऊ ऋ ॠ ऌ=अक् ।

४. अकः सवर्णे अचि परे दीर्घ एकादेशः स्यात् ।

दैत्य+अरिः=दैत्यारिः, श्रीशः, गुरूपदेशः, होतॄकारः ।

## पूर्वरूपम्

संज्ञा :—ए ओ=एङ् ।

५. पदान्तादेङः ह्रस्वाकारे परे पूर्वरूपमेकादेशः स्यात् ।

हरे+अव=हरेऽव, रामोऽयम्, सोऽपि ।

## श्चुत्वम्

संज्ञा :—च छ ज झ ञ=चुः, चुत्वम् ।

त थ द ध न=तुः ।

६. सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः ।

हरिस्+शेते=हरिश्शेते, रामश्चिनोति, सच्चित्, राजञ्जय ।

*For copies apply to :—*

1. Vidwan K. Narasimhachar
   46, IV Main Road, Chamarajapet,
   Bangalore-18.

2. Vedantha House
   92, 6th Main Road, Chamarajapet,
   Bangalore-18.